A.C. Joshi Library
P.U. Chandigarh

MSS No. 191 Subject Language

Name of MSS Sārasvataprasāda
सारस्वत प्रसाद

Author Bapudev
बापूदेव

Period - - Folios 4

Script Sanskrit Source Prithipal Singh, Amritsar

Missing Folios - -

191



191

॥ॐ॥ श्रीगणेशाय नमः श्रीसरस्वत्यै नमः वंदे यच्छंदावकहंदं वंघपादारविंदं दलितारिवृंदं श्याभीत
माभीरवधूभिरेतं गोपालभूपालमलं कृपालम् १ यस्यातिवासा हृदनारविंदे संदोपि वाचस्पति
तामुपैति सदस्वसंपूर्णसुधांशुभासा सरस्वती सास्तु जताम्नतिंमे २ श्रीचंद्रकीर्तिसूरमानमद्दुद्धि
राजं तथा गुरुं सारस्वतप्रसादोयं वासुदेवेन दीयते ३ तत्र स्तुविकीर्षितग्रंथप्रतिबंधकीभूत
विघ्नविघातहेतुकृद्लौकिकाविगीतसकलशिष्टाचारपरंपराप्राप्तइष्टदेवतानतिरूपमाचरितमंगा ले
लं शिष्यशिक्षार्थं समुपनिबध्नन् प्रेक्षावत्प्रवृत्तिमात्रहेतुभूतानविषयप्रयोजनसंबंधाधिकारिण
श्च सूचयन् प्रतिजानीते प्रणम्येति कर्त्रर्थकोत्तमपुरुषैकवचनात् क्रियापदप्रयोगाच्चावितस्मा
नाधिकरणात्सदोत्र यदहं अनुभूतिस्वरूपाचार्यः सारस्वतीं प्रक्रियां वक्ष्ये इत्यन्वयः सरस्वत्या प्रो
क्ता सारस्वती प्रोक्तार्थे अणिति अण् त्रणई इति ई प्रक्रियते प्रकृतिप्रत्ययादिविभागेन व्युत्पाद्य
ते यथा या सा प्रक्रिया तस्याश्च सरस्वतीप्रोक्तत्वेन सिद्धत्वात्तामनूद्य स्वत्वं विधीयते तस्याए
व ऋजुत्वभावान्न दंष्टं करोतीति वक्ष्यमाणं त्वरस्वत्या प्रोक्तानि सूत्राणि सारस्वतानि तत्संबं
धिनीति व्याख्याने तु हाव्यक्तः इति छः स्यात् तस्य च वृद्धसंज्ञा स्वैवकत्वेन संज्ञासूत्रंको विधि पतित्य
त्यनिष्टत्वेन कथं चित्समाधाने पि शेषिकादणः शैषिकाण्लोबाधः सरस्वती प्रोक्त प्रक्रियाकर
णोच विप्रपेषणादि दोषरसादि निरस्त यथ तत्तद्भावात्कष्टकल्पितियोग्यं विशमावयिवक्तव्यत्वेन क्वो

वार्त्तिकत्वेनासार्वत्रिकत्वात् १

विवक्षात्र वस्तुतस्तत्कृतिविषयमात्रस्य कर्मणोऽभूततद्भावात्कर्मार्थकद्वितीयाद्यनुपपत्त्या चौर
स्य चौरं च कृन्ततियोग इत्यादौ शेषत्वकर्मत्वविवक्षावत्कृतिसाध्यत्वमात्रविवक्षायां द्वितीयैव अभूतत
द्भावस्य च विशेषणार्थस्य विवक्षायां च्विप्रत्यय इति अत्र यद्यपि अस्य वालब्ध्युत्पादकत्वात्स्वरितोभिता
त्क्रियाफलस्य स्वरितञितः कर्त्रभिप्राये क्रियाफल इति नियमादात्मनेपदप्रयुक्ततया ण्यस्य वेद्य
त्वानुसारित्वेन तत्तत्त्वतः परत्वाभावात्तत्त्वस्य पूर्वकस्यात्मनगामिते नचात्मनेपदं ध्रोर्विद्यते इतिष्टीहे विधे
हीहे मे तत्पूर्वकत्वेनानित्यत्वाद्धीहे विधेयत्वापेक्षत्वेनान्तरंगत्वात्सिद्धं वहिरंगमन्तरंग इति उक्तत्वात्सिद्ध
त्वाद्धाकृर्वेद्रव्यत्वद्वीत्योभावः आरंभात्समाप्तेर्वर्त्तमानत्वे वर्त्तमानसामीप्ये वर्त्तमानवद्देतिवा स्त
त्रपाठादिक्रमातिक्रमेणप्रयोगास्तु कृलस्त्रादिक्रमकरणात्तमस्तुकेरणे अतश्चस्व कृपोलकः
त्यितत्वाद्यन्नवकाशः साहात्मस्वस्वतीप्रणीतत्वेनान्यप्रक्रियोत्कर्षस्तत्र मन्त्रलक्षमात्रेचेहिधीयते
तदायां कोविस्मक्रियामनुघस्नुत्वविधीयता भिमतश्चाह किंविशिष्टंप्रक्रियानातिविस्तरां न अति
विस्तरः शाह्ववादुल्यंयस्यांसातथानअतिविस्तरानातिविस्तरेतिमयूरव्यंसकादित्वात्तस्वरूपेणोवाने
षधमादिवत्रिषेधार्थनकारेणसमासात्सानुबंधकग्रहणेननिरनुबंधकस्येति अनसरेउस्यनाटे
शोननेतिपृथक्पदंवा अथवाव: व्याकरणस्य तावद्वनादिपरंपराप्राप्तसाधुशब्दानुशासनत्वेनते
षांचानेनन्नानाणान्यादेभिरपिप्रयोगेकथारणेः पृषोदरादीनितिथयोपदिष्टमित्यादिना लाक्षणिका
नामेवसाधुत्वाभिधानात्तालव्यामोदकविस्तरसम[illegible]द्दत्यापरमकरुणाकरयाश्रीसरस्वत्यापि च

वाधितत्वाच्छब्दविपरीतविधानयोगविभागतंत्रधर्मादिभिः समस्तसाधुशब्दानुशासनप्रक्रियाप्रक
ल्पानुभूतिस्वरूपायस्वभक्ताया अनुभावितात्मस्य च सर्वातिशयोत्तमप्रकर्षत्वमर्जयति ननु सम
स्करीशुभं च केप्रक्रियोचतुरो विनामित्यनेभिधानात्प्रतत्वमात्रविधानमयुक्तमिति चेत् मैवं
तथापि प्रक्रियामनूद्य शुभत्वविधानात् तस्मात्सूक्तं ननु श्रेयांसि बहुविघ्नानीति श्रेयः साध
नभूते प्रक्रियार्णवकरणे विघ्नैर्भवितव्यमत आह किं कृत्वा परमात्मानं प्रणम्येति परा जगत्का
रणत्वेनोत्कृष्टमात्मा यस्या शक्तिर्यस्य स परमः ब्रह्म मायोपाधिमानेन शक्तिविपर्ययः परैरुपनिषद्भि
र्वेद्यः स द्रष्टुमानैर्वामीयते ज्ञायत इति वा परमः अततिविश्वं व्याप्नोतिविषयानादत्ते अत्तिवा सर्वा
त्मा परमश्चासावात्मा चेति परमात्मा कार्यैकारणाविलक्षणो नित्यशुद्धबुद्धमुक्तस्वभावस्तं पर
मात्मानमितिशेषः अकादेवं वा प्रकर्षेण भक्तिश्रद्धातिशयेन नत्वा प्रथमं प्रकर्षं वा विप्रशब्दप्रयो
गः श्रीशब्दादिवत् स्वरूपतो मांगलिकत्वादेतद्ग्रन्थे तेन च प्रकर्षप्रयोगस्यैव नाच्च पूर्वकालार्थे
कक्तापाप्यारंभात् स्वेमाचरणीयत्वेन त्यादेर्बोध्यते ननु यावत्प्रयोजनेनास्य संबंधो न निरू
प्यते संबंधानभिधाय्यिन्वाङ्बेनावदसंगति रिति प्रयोजनाकांक्षायामाह बालधीवृद्धि
सिद्धये इति बले: कामधेनत्वाह लंति च लेतिङ्बेधार्यादिति बालाः शब्दव्युत्पत्तिरहिता
स्तेषां धियो बुद्धिर्व्युत्पत्तिस्तस्याः सिद्धिर्निष्पत्तिस्तस्यै सिद्धिर्निष्पत्तिस्तस्यै प्रयोजनभावः इत्युक्ता २
गमलशसंदेहाः प्रयोजनानीत्यादिना महाभाष्योक्तव्याकरणप्रयोजनान्यपास्तानि यद्वा क्रम

त्वाख्यानप्रयोजनं न तदप्यन्यतः सिद्धेर्वल्यसिद्धेस्ततौ चेत्यादिनांत न्नप्रयोजनसंभवात वार्तिकका
शब्दव्युत्पत्तिमात्रात् रैरध्ययनादिभिरेव वेदपाठस्येव रक्षादेरपि तत एव संभवाज्ज्ञातीव प्रयोजनमनमुक्तमतः केवलं साधु
त्वासाधुत्वज्ञानमेव प्रयोजनत्वेन विज्ञायते विचारविशेषस्य विस्तरभयात्रेहोक्तः अत्र च प्रक्रिया
र्णवे विषयः बालव्युत्पत्तिः प्रयोजनं जन्यजनकभावः संबंधः शाब्दव्युत्पत्तिलिप्सुस्त्वाधिकारीत्य
नुबंधचतुष्टयमपि तन्नत्यादैः संकथितं । ननु पूर्वैर्व सर्वे शाब्दव्युत्पत्त्यादिका कापि प्रक्रिया क्रियता
मित्यत आह इन्द्रादय इति इन्द्रश्चन्द्रः काशकृत्स्नापिशली शाकटायनः पाणिन्यमरजैनेन्द्रा जयंत्य
ष्टादिशाब्दिकाः इत्याद्युक्तो पेन्द्रचान्द्रादिव्याकृतिकर्तारः महेन्द्रादयो देवा वा यस्य शाब्दवारिधेः शाब्द
समुद्रस्य अन्तं पारं प्रापुः न यापरिच्छेदं न ययुः तथा च श्रुतिः दिव्यं वर्षसहस्रं किलेन्द्राय बृहस्पतिः
पारायणं प्रोवाच नान्तं जगामेति तस्य कृत्स्नस्य समस्तस्य प्रक्रियां वक्तुं नरो माहृग्मनुष्यः कथं नमः
समर्थः अपि कैमुतिकन्यायसूचनार्थः आसवाल्मीकाद्युक्तसमुच्चयार्थो वा अयमपि सन्धिः
पदाकाचस्यादयो वक्तारः इन्द्रादयो ऽध्येतारः दिव्यवर्षसहस्रादिश्च समस्तपाठादयो ऽध्येतारश्च
इन्द्रादयो ऽध्येतारः यस्तथापि प्रतिपदपाठेनापि पारागमनं दूरतस्तु व्युत्पादनं तदा माहृशमनुष्येण
मंदमतिना मेदभाषेनाल्पायुषा नेतविज्ञाभिम् तेन कथंकारं सर्वशाब्दव्युत्पादकप्रक्रियां तरं कार्यमि
त्येतस्यापवादत्वादेव हत्तु विधानमुचितमिति संज्ञाविधानमंतरेणासुखप्रतिपत्त्यसंभवादतो यास्य
मानसंज्ञासंग्रहं प्रतिजानीते तत्रेति तत्र प्रक्रियार्णवे विधेयत्वावत्तस्य च संख्यावहारोपसम्पक्तशास्त्र

प्रौ॰ १ प्रवृत्तये संज्ञा यस्मात्तदाद्यमर्थो बोध्यः इत्येवं संकेतहृत्यासरस्वती पूर्वाचार्यैः कृता मयासंग्रहः तत्र
र्थः तत्राकारादिक्रमेण वर्णमात्रिकामप्युपदेष्टुमाद्यसूत्रमाह अइउण् यस्तदमिदं संज्ञासूत्रं यद्यपि
अकारादीनां प्रत्येकस्याविवक्षितत्वात् प्रातिपदिकत्वासंभवात् विभक्त्यसंभवे पदत्वासंभवस्तथापि वास
देवादीनामर्थानां संज्ञात्वात् विवक्षामात्रात् प्रातिपदिकसंज्ञानिषेधासंभवाद्वा निपातस्य चानर्थकस्ये
२ ति वा प्रातिपदिकत्वाद्विभक्त्युपत्तेः पदत्वे तस्यास्य लुक् देवात्स जाणि भवतीति छान्दसत्वात्र यणाहुक
त्वेपाक्त विभक्तेः प्राप्तस्य लोपे वा लोपस्य वा पदस्य च सरस्वती कृतेसूत्रे कस्योऽज्ञादीर्घ वहुवचनेच
प्रत्येकसंज्ञासिद्ध्यर्थं अन्यथाहृत्वावनमितिवत्समुदायसंज्ञा स्यात् तत्र संज्ञासंज्ञिनोरभेदोपचारात्
विशिष्टमिति द्वैयाम्यविसृष्टप्रभृत्यर्थोऽतःसम्प्रारणेन मंगलार्थः यत्तु संध्यकरणमसंदेहार्थं संधौहि
सति यकारादीनामपि समानसंज्ञासंदेहः स्यात् तदयुक्तं व्याख्यानतो विशेषप्रतिपत्तेर्न हि संदेहादलक्ष पत्ति
णमिति वचनाद्व्याख्याने न तत्संदेहनिरासासंभवात् अन्यत्स्यापि सूत्रत्वेन संधिस्त्रगणसिद्ध
त्वात् तदभावइत्याहु तदप्यसत् व्याकरणस्याप्तादित्वेनातोऽस्मरित्यादाविव संधिसंभवात् केचित्तेषां
निपातनात्पाठात् प्रकृतिभावमाहुः वस्तुतस्तु यस्तदत्वेनवाक्यत्वात्संहितैकपदे नित्या नित्याधा
तूपसर्गयोः नित्या समासे वाक्ये तु सा विवक्षामपेक्षत इति वचनात् विवक्षाभावात्संध्यभावः एवं चा
ग्रिमग्रंथसंगतिरपि नत्तुसमाना इति महासंज्ञाविज्ञानात्समानेन तुल्यमानं परिमाणं येषां इत्यन्वर्थता
द्विवस्वरूपाणामेषां कल्पसमानत्वमितिचेत् सत्य रूक्षदीर्घप्लुतोदात्तानुदात्तस्वरितसानुनासिकनिर

नुनासिकविहृतादिभेदैः समानमानत्वात्सवर्ण्यं ननु वर्णपरिगणनमंतरेणसंज्ञाविधानानुपपत्ते
र्दीर्घवकारादेकंवाकासंज्ञाकोष्ठंचेद्विशाखेस्याद्वितीयकेनानेनवाक्येनवाक्यभेदप्रसंगादर्थद्वयप्रतिपादनम
शक्यमित्यतआह यत्नेनेति वर्णपरिगणनस्यानुषंगिकत्वादर्थद्वयविधानाभावान्नवाक्यभेदापत्ति
रितिभावः प्रयत्यतेक्रियतेसंकोचोयेनवर्णोयैः प्रतिकार्यमाक्रियंतेवाप्रयत्नाहाराः यत्वादिसंज्ञास्तेषांग
हणायेत्यर्थः प्रयत्नाहाराणांसंज्ञारूपत्वात्संज्ञासंग्रहोतः पोरयणनंनाकस्मिकं एतेषुसत्स्वेष्विति व
हुवचनेवहूनामाणांसहाभिप्रायेणतान्यभिप्रायेणज्ञात्वाख्यायामेकस्मिन्बहुवचनमन्यतरस्यामि
तिवा यवयवावयविनोरभेदोपचारात्सजावयववर्णाभिप्रायेणवा वस्तुसिद्धेविवक्षितः नुविवक्षि
तः विवक्षितस्तस्यभावस्तत्त्वंतस्मात् ततः किमतआह विवक्षितत्वमिति यत्रयत्रविसंधिर्विवक्षितएवम
वतिविवक्षितः संधिरेवमवृत्तौस्मयथानियमासंभवः एकपदाद्येविवक्षाभावेपिसंधेरावश्यकत्वात
ईदूदेदंतानांद्विवचनांतानामेकस्वराणांनिपातानांचयात्तयोविवक्षायामपिसंध्यभावाच्चतयोर्विवि
वेषायोन्नशाखाहाक्यविषयत्वेनियमस्यावगम्यते विवक्षाभावेहेतुमाह लौकिकेति लोकेभवा
लौकिकावालास्तेषांप्रयोगज्ञानाय अथवालौकिकप्रयोगाद्व्याख्यानयादयोऽन्नादिहहप्रयोगास्तत्सि
द्धयेसमयः संकेतस्तन्मात्रत्वादुपदेशोञ्ज नुनासिकइतिस्यादौकृतत्वाभावइवाज्ञापिसंध्यभावइतिभावः
हिपदत्वपक्षेवाधहेतुः चकारोनिपातत्वात् हेत्वंतरसमुच्चयार्थः ननुपरिगणितानांपवानामेवसमान
त्वेनतानामित्यादौदीर्घवर्णादीनांसमानकार्यंनस्यादित्यतःसूत्रांतरमवतारयति ह्रस्वः ह्रस्वस्यदीर्घस्य

प्रौ ४

प्लुतश्च भेदौ दात्तादयः एतेषामित्यनंतरोक्तसमानानामित्यर्थः समाना वर्णाः सवर्णा इत्यन्वर्थता त्रिशतानाम स
मानस्थानप्रयत्नानामेषां सावर्ण्यं परस्परमिति ऋलृस्य ऋसदीर्घलृतेः दीर्घस्य दीर्घलृतऋस्वः प्लुत
स्य ऋसदीर्घैः सवर्णेन ततश्च वर्णग्रहणे सवर्णस्यापि ग्रहणमिति ऋस्य सवर्णानां दीर्घादीनामपि स
मानत्वात्तत्कार्यं भवत्येवेति भावः ऋलृवर्णयोस्त्वाशाभूतरलयोः सावर्ण्यात् सावर्ण्यं ननु ऋस्या
दिसंज्ञाविधानमंतरेण तत्स्वरूपाप्रत्ययात् तत्सावर्ण्यसंभवः इत्यत आह लोकादिति शेषस्यानुक्तस्य
लोकतोऽवगतिः ह्रस्वव्यवहारप्रसिद्धेः ऋस्यादीनामुदात्तादिनोदात्तादिसंज्ञासंग्रहः मीयते इति मात्राः तिस
ह्रस्वस्य यावस्था एका मात्रा उच्चारणकालो यस्य स एकमात्रः एवमपरत्रापि तद्वत् एकमात्रो ह्रस्व
इत्युक्तो द्विमात्रो दीर्घ उच्यते त्रिमात्रस्तु प्लुतो ज्ञेयो व्यंजनं चार्धमात्रकमिति उच्चैरिति स्थानविशेषणे
न वर्णानां तथाच ग्रहेष्वस्थानानि वर्णानामुरः कंठः शिरस्तथा जिह्वामूलं च दंताश्च नासिकोष्ठौ च
तालु चेत्यष्टौ स्थानानि वर्णानां तेषु चोच्चनीचसमभेदात् त्रयो भागास्तत्र नाभिदेशादुदेति सा श्रुति
वाताहतोऽभिव्यक्तिस्तत्रोच्चभागो अभिव्यक्त उदात्तः नीचभागोऽनुदात्तः समभागे स्वरितः स्यादिति एवं
पंचपदे द्विपदे वा पूर्वं वर्णसंध्याभावादि च संधेर्ज्ञातानीवाहृत्य संध्यक्षराणीति यो नाम ह्रस्वापेक्षा
दि वद्दवयवग्रस्तत्सिद्धावादन्वर्थता ग्रतो नाकारादिसंकरः द्विमात्रत्वेन ऋस्यभेदाभावः ऋस्यान
संतीत्युच्चावचदीर्घप्लुतोदात्तादयो भेदाः संतीत्युक्तं भवति एवं च ग्रुडुउस्य वर्णानां ऋस्योदात्तसानुनासि ४
कनिरनुनासिकादिभेदैरष्टादशधा भेदभिन्नत्वं लृवर्णस्य दीर्घप्रयोगाभावात् लृवर्णस्य द्वादश